श्री गणपति गीता

श्री गणपति गीता

क्व प्रासूत कदा त्वां गौरी न प्रामाण्यं तव जनने |
विप्राः प्राहुरजं गणराजं यः प्राचामपि पूर्वतमः ||1||

नासि गणपते शंकरात्मजो भासि तद्वदेवाखिलात्मकः |
ईशता तवानीशता नृणां केशवेरिता साशयोक्तिभिः ||2||

गजमुख तावकमंत्र महिम्ना सृजति जगद्विधिरनुकल्पं |
भजति हरिस्त्वां तदवनकृत्ये यजति हरोऽपि विरामविधौ ||3||

सुखयति शतमखमुखसुरनिकरानखिलक्रतु विघ्नघ्नोऽयं |
निखिलजगज्जीवकजीवनदः स खलु यतः पर्जन्यात्मा ||4||

प्रारंभे कार्याणां हेरंबं यो ध्यायेत् |
पारं यात्येव कृतेरारादाप्नोति सुखं ||5||

गौरीसूनोः पादांभोजे लीना चेतोवृत्तिर्मे |
घोरे संसारारण्ये वासः कैलासे वास्तु ||6||

गुहगुरु पदयुगमनिशमभयदं |
वहसि मनसि यदि शमयसि दुरितं ||7||

जय जय शंकरवरसूनो भयहर भजतां गणराज |
नय मम चेतस्तव चरणं नियमय धर्मेऽंतः करणं ||8||

चलसि चित्त किन्नु विषमविषयकानने
कलय वृत्तिममृत दातृकरिवरानने |
तुलय खेदमोदयुगळमिदमशाश्वतं
विलय भयमलंघ्यमेव जन्मनि स्मृतं ||9||

सोमशेखरसूनवे सिंदूरसोदरभानवे
यामिनीपतिमौळये यमिहृदयविरचितकेळये |
मूषकाधिपगामिने मुख्यात्मनोऽंतर्यामिने
मंगळं विघ्नद्विषे मत्तेभवक्त्रज्योतिषे ||10||

अवधीरितदाडिमसुम सौभगमवतु गणेशज्योति-
-र्मामवतु गणेशज्योतिः |
हस्तचतुष्टयधृत वरदाभय पुस्तकबीजापूरं
धृत पुस्तकबीजापूरं ||11||

रजताचल वप्रक्रीडोत्सुक गजराजास्यमुदारं
भज श्रीगजराजास्यमुदारं |
फणिपरिकृत कटिवलयाभरणं कृणु रे जनहृदिकारणं
तव कृणु रे जनहृदिकारणं ||12||

यः प्रगे गजराजमनुदिनमप्रमेयमनुस्मरेत् |
स प्रयाति पवित्रितांगो विप्रगंगाद्यधिकतां ||13||

सुब्रह्मण्यमनीषिविरचिता त्वब्रह्मण्यमपाकुरुते |
गणपतिगीता गानसमुचिता सम्यक्पठतां सिद्धांतः ||14||

इति श्रीसुब्रह्मण्ययोगि विरचित श्री गणपति गीता||